अथप्रासादोद्यापनप्रतिष्ठाप्रारंभः

DR. BHAU DAJI
MEMORIAL

॥श्रीगणेशायनमः॥अथनैमित्तिकमीयंयांतरंचावलंब्य॥प्रसादप्रतिष्ठापद्धतिर्लिख्यते॥तत्रस्वयंभुविदेवेपूर्वप्र
तिष्ठितेवाअदृश्यमानेप्रासादाक्रयवेवाग्रहया॥शिल्पन्यासपूर्वकंपाषाणेष्टकादार्वादिभिर्नवंप्रासादंनिर्मय
सिधेप्रासादेस्वानुकूलेक्रियासादाङ्गतःपूर्वतःईशान्यांवाद्वादशहस्तंदशहस्तंअष्टहस्तंवामंडपंकृत्वात
न्मध्यत्रिभागेवेदिकामापाद्यतस्याःपरितःप्रतिष्ठायागवत्पंचकुंडानि॰आचार्यकुंडादीशानभागेग्रहपी
ठंनैर्ऋत्यांवास्तुपीठंचनिर्मायग्रहस्रंस्रुक्स्रुववुग्मपंचकं॰नवग्रहसंभारो॰वास्तुपूजाद्रव्याणि॰मंड
लरचना॰क्षेत्रोपकरणद्रव्याणि॰कुंडकलशाः पंच॰वास्तुमंडलशांतिकलशास्त्रयः प्रासादस्नपनकलशाए
काशीतिःअधिवासनकलशाअष्टौद्वारकलशाअष्टौ॰यथासंभवंव्यापारकलशाश्चातथाऋत्विक्संख्यया
होमद्रव्यदानपात्राणि॰स्वर्णपद्म॰ताम्रमयमर्घ्यपात्रं॰आचार्यकुंडेवरुस्थाली॰प्रतिकुंडमन्यस्थाल्यः॥मं
डपपताकादश॰प्रासादस्यैका अन्येषांचसमीपवर्तिक्षुद्रप्रासादादीनांयथासंभवं॰द्वारकलशेषष्टसुपंच
सुकुंडकलशेषुवास्तुमंडलशांतिकलशेषुत्रिषुतथाग्रहमंडलवास्तुमंडलतद्देवतानांचब्रह्माचार्यादी

स्त्रुत्येष्ठौ १

नांवरणवस्त्राणि॰यथावर्णग्रहवस्त्राणि॰शिल्पिनांच॰होमद्रव्याणियथोक्तानि॰आज्ययवतिलाश्चेति॰सर्षपाः
पंचगव्यानि॰स्नपनकलशद्रव्याणिअधिवासनद्रव्याणि॰यथोचितंगंधपुष्पादीनिपूजाद्रव्याणिअन्यच्चोपकरण
जातंचेतिसंभारान्संभृत्यदेवप्रतिष्ठायोग्यंदिनंनिश्चित्यतत्पूर्वस्वानुकूलेक्रियतनित्यक्रियः गृहेगृहांगणेवा
शुभासनेसपत्नीकःप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्य॥अद्यआत्मनः पापक्षयपू
र्वकंदशपूर्वान्दशापरानात्मनासहैकविंशतिपुरुषानुद्धृत्यवैस्मपरमपदप्राप्तिकामः एकरात्राद्यधिवास
पक्षेणाचार्यर्त्विग्द्वारप्रासादप्रासादप्रतिष्ठामहंकरिष्ये॥वैस्मवपदस्थानेशैव॰गाणपत्य॰शाक्तपरमपदप्रा
प्तिकामइत्याद्यूह्यं॥॥तथाचअस्मिन्कर्मणियथानुकूल्यसिद्धिद्वारासर्वारिष्टनिर्बर्हणार्थंअस्यकर्मणः साङ्गु
ण्यार्थंआयुरारोग्यैश्वर्याभिवृद्ध्यर्थंचआचार्यादिद्वारानवग्रहमरवाख्यंकर्म॥तथाचप्रासादवास्तोर्मंडपकुंड
तोरणस्तंभादिषून्नाधिकदोषपरिहारार्थंवास्तुविधानतः वास्तुयजनं॰तथाचप्रासादवास्तोरून्नाधिकपा
षाणदोषप्राणिवधादिदोषजनितदुर्निमित्तोपशमनद्वारास्त्रीपरमेश्वरप्रीत्यर्थंवास्तुहोमपूर्वकंअघोरमंत्रेण

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

चतिजैः शांतिहोमंकरिष्ये॥आदौएतत्कर्मांगंनिर्विघ्नतासिध्यर्थंमहागणपतिपूजनंपुण्याहवाचनंमातृकापूजनं
नांदीश्राद्धमाचार्यादिवरणानिचकरिष्ये॥इतिसंकल्पवरणादिवस्त्रादिपूजांतंकृत्वा॥पूर्णकलशहस्तआचार्य
दिसहितोयजमानःशांतिघोषेणउपकरणसामग्रीमादायमंगलतूर्यनिनादेनयागमंडपमागत्यनमस्कृ
त्यपश्चिमद्वारेणप्रविश्यप्राङ्मुखउपविश्यहोमद्रव्याणिउदग्द्वारेणान्यअन्यद्रव्याणिचयथायथंनिवेशये
दिति।ततआचार्येमिथ्यवेद्यांस्थाप्यदेवतायोग्यं·शिवेतिंगतोभद्रः विष्णोसर्वतोभद्रं·सर्वेषुवासर्वतोभद्र
मितितद्देवतामंडलं·ग्रहवेद्यांग्रहमंडलंवास्तुवेद्यांवास्तुमंडलंचकृत्वा॥आचार्यःआचम्यदेशकालौसं
कीर्त्यअस्मिन्·कर्मणियजमानेनहतोहमाचार्यकर्मकरिष्ये।आदौनिर्विघ्नार्थंगणेशपूजनंशरीरशुध्यर्थं
कर्माधिकारार्थंचनूतनशुध्यादिविहितंकरिष्ये॥संकल्पकृत्वा॥ॐयद्यत्रेतिगौरसर्षपान्विकीर्य·शुचीवइ
तिपंचगव्येनशुद्धोदकेनचयागमंडपमंतर्बहिःप्रासादंचसंप्रोक्ष्यमंडपनैर्ऋत्येवास्तुवेद्यांब्रह्मादिवास्तुम
ण्डलपूजांकृत्वाकुंडांतरेस्थंडिलेवाअग्निंप्रतिष्ठाप्य·ग्रहवेद्यांग्रहान्प्रतिष्ठाप्य·ग्रहैकतंत्रेणपृथक्वावास्तु

यागंयद्यागंचकृत्वामंडपंनैर्ऋत्रिसूत्र्यावेष्टयेत्॥यद्यावास्तुदेवतानांनैवेद्यशेषान्नेनबलिंदत्वायद्होमंकृत्वारा
क्षोघ्नादिनिमंडपंत्रिसूत्र्यावेष्टयित्वातोरणादिपूजामारभेत्॥यथा।मंडपप्रागुदाराद्बहिर्हस्तमात्रेऽश्वत्थतोरणं
सुदृढनामकमग्निमीळइतिनिधायसुदृढतोरणायनमइतिसंपूज्यचंदनमालापुष्पादिशोभितंकृत्वाराजत
हस्यतीतत्रविन्यसेत्ततत्रैकःकलशःस्थाप्यः।तत्रमंत्रः।महीद्यौरितिभूमिंस्पृष्ट्वा।ओषधयसमितियवान्निक्षि
प्यआजिघ्रकलशंघ्रितिवाकलशं·इमंमेइतिकलशंजलेनापूर्य।गंधद्वारांइतिगंधाद्याओषधीरितिसर्वौषधीः
ओषधयःसमितियवान्·कांडात्कांडादितिदूर्वाःअश्वत्थेवइतिपंचपल्लवान्·स्योनापृथिवीतिसप्तमृदः याःफ
लिनीरितिफलं·सहिरत्नानीपंचरत्नानि·हिरण्यरूपइतिहिरण्यं·युवासुवासाइतिवस्त्रेणरक्तसूत्रेणमुखे
वेष्टयित्वापूर्णादर्वीसुपरिधान्यपूर्णंपात्रंनिधायअस्मिन्कलशेध्रुवमावाहयपूजयेत्॥ततोदक्षिणे·सुभद्रतोर
णायनमःइषेत्वेतिनिधाय·नाम्नापूजयित्वातोरणेसूर्यांगारकौ·विन्यस्यप्रपूज्यपूर्ववत्कलशंप्रतिष्ठाप्यतत्रध
रामावाहयपूजयेत्॥ततःपश्चिमेसुकर्मतोरणायनमअग्नआयाहीतिनिधायनाम्नापूज्यतत्रशुक्रबुधौन्यस्य

पूजयित्वापूर्ववत्कलशे वाक्पतिमावाह्यपूजयेत्॥ततउत्तरे।सुहोत्रतोरणायनमःशंनोदेवीरितिनिधायनोम्ना
पूजयित्वातत्रसोमकेतुशनीन्यस्यपूजपूर्ववत्कलशेविघ्नेशमावाह्यपूजयेत्॥ततःपूर्वद्वारमागत्यप्रतिहारश
खंकलशंएवंमंत्राहुत्याकलशत्रयंप्रतिष्ठाप्य।ऐरावतंकलशत्रयेन्यस्यपूजयेत्।ततऋग्वेदिनाहुत्विजौपूर्वद्वारे
शांतिसूक्तजपार्थत्वेनत्वांवृणे॥ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदेवतः॥अत्रिगोत्रस्ऋषिर्ब्रह्मक्रत्विग्त्वंमेमखे
भवेतिप्रत्येकंवृत्वाअग्निमावाह्यइतिप्रत्येकंपूजयेत्।ततःसहस्राक्षंमत्तैरावतस्थितंपीतंकिरीटकुंडलधरंदक्षि
णवामकरस्थवज्रोत्पलमिंद्रंध्यात्वा॥एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेशसंवीज्यमानोमरस
गणेनरक्षाध्वरंनोनगवज्रमस्तेनोइंद्रइहागच्छेहतिष्ठेतोइंद्रसांगंद्वारकलशत्रयेआवाह्यपीतांपताकांपीतं
ध्वजंचत्रयमपिपंचपंचहस्तंदंडेउछ्रयेत्इंद्रंवदति।ततःत्रातारमिंद्रमितोइंद्रंपूजयेत्।इंद्रःसुरपतिःश्रेष्ठोवज्रह
स्तोमहाबलःशतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमःइतिनत्वा।इंद्रायसांगायसायुधायसराक्तिकायैनमा
षभक्तबलिंसमर्पयामीतिसमर्प्यचम्य॥आग्नेय्यांगत्वाकलशंप्रतिष्ठाप्यत्रैतेपुंडरीकममृतंचसंस्थोप्यपूज

यित्वा।छागस्थंरक्तंदक्षिणवामकरत्रयधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा।एह्येहिसर्वामरहव्य
वाहमुनिप्रवरैरभितोभिजुष्टतेजोवतालोकगणोनसाधंमाध्वरंपाहिकवेनमस्ते।भोअग्नेइहागच्छेहतिष्ठेति
कलशेऽग्निमावाह्यरक्तपताकांध्वजंचाग्निंहतमित्युछ्रित्य।त्वंनोअग्नइत्यग्निंपूजयित्वा।आग्नेयःपुरुषोरक्तः
सर्वदेवमयोव्ययः।धूम्रकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वा।संगायेत्याद्यग्नयेबलिंसमर्प्यचम्य॥द
क्षिणेगत्वाप्रतिहारशंखंप्राग्वत्कलशत्रयंप्रतिष्ठाप्यवामनदिग्जंतत्रन्यस्यपूज्य।यजुर्वेदिनाहुत्विजौदक्षि
णद्वारेशांतिसूक्तजपार्थत्वेनत्वांवृणे।कातरोक्षोयजुर्वेदस्त्रेषुनोविष्णुदैवतः।काश्यपेयस्ऋषिर्ब्रह्मक्रत्विग्त्वंमे
मखेभवेतिप्रत्येकंपूजयित्वा।महिषारूढंधृतदंडपाशदक्षिणवामकरत्रयंकज्जलनिचयोपममग्निसमलो
चनंयमंध्यात्वा।एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्ते।शुभाशुभानंदसुचामधीशशिवायनःपाहि
मखंनमस्ते।भोयमेहागच्छेहतिष्ठेतियमंसांगंद्वारकलशत्रयेआवाह्यआयंगौःपृश्निरितिकृष्णपताकांध्वजंचो
छ्रित्य।यमायसोममितियमंपूजयित्वा।महामहिषमारूढंदंडहस्तंमहाबलंआवाहयामियन्तेस्मिन्मूनैर्यंप्र

तिगृह्यतामितिनत्वायमायबलिंसमर्प्यचम्य॥नैर्ऋत्यांकलशंसंस्थाप्यतत्रऊमुद्दंष्ट्रंनर्यंचपूजयित्वा।प्रेतासनंम
हाकायंखड्गहस्तंमहाबलंनीलंबक्रराक्षसवेष्टितंपीतभरणभूषितंनिर्ऋतिंध्यात्वाएह्येहिरक्षोगणनायकत्वंवि
शाननेवेतालपिशाचसंघैःममाध्वरंपाहिपिशाचनाथलोकेश्वरत्वंभगवान्नमस्ते।नोनिर्ऋतेरिहागच्छेहतिष्ठे
ति·निर्ऋतिंकलशेसंस्थाप्यनीलपताकांध्वजंचमोषुणइत्यृछित्य।असुरंतमितिकलशेनिर्ऋतिंपूजयित्वा।
निर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं।आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिनत्वा।सांगायनिर्ऋतये
बलिंसमर्प्यचम्य॥पश्चिमे·द्वतिद्वारशारवंकलशंप्रतिष्ठाप्यत्रैतेअंजनदिग्गजंपूजयित्वा।सामवेदिनंहत्विजो
पश्चिमद्वारेशांतिसूक्तजपार्थत्वेनत्वांहृणे।सामवेदसुपिंगाक्षोजागतःशक्रदैवतः॥नारदाजस्कविप्रेंद्रकृत्वि
क्कंमेमखेभवेतिप्रत्येकंहृत्वा·ममआयाहीतिप्रत्येकंपूजयित्वामकरस्थंपाशहस्तंशुक्लवर्णंकिरीटिनंवरुणंध्या
त्वा॥एह्येहियज्ञेगणवारिधीतांगणेनपर्जन्यमहाप्ररोनिः॥विद्याधरेंद्रामरणीयमानपाहित्वमस्मान्भगव
न्नमस्ते।नोवरुणेहागच्छेहतिष्ठेतिसांगादिद्वारकलशद्वयेआवाह्यश्वेतपताकांध्वजंचसमंमंत्रमुच्छ्रित्यतत्त्वाया

मीतिवरुणंपूजयित्वा।पाशहस्तंचवरुणमर्णसांपतिमीश्वरं।आवाहयामियज्ञेस्मिन्वरुणायनमोनमःइतिनत्वा
सांगायेत्यादि·वरुणायबलिंसमर्प्यचम्यवायव्यांप्राग्वत्कलशंनिधायतत्रपुष्पदंतंसिद्धार्थंचपूजयित्वा।मृ
गाधिरूढंधूम्रवर्णंचित्रांबरधरंयुवानंवरध्वजधरंदक्षिणवामकरद्वयंवायुंध्यात्वा।एह्येहियज्ञेममरक्षणायमृ
गाधिरूढःसहसिद्धसंघैः।प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते।नोवायोइहागच्छेहतिष्ठेतिसांग
दिवायुकलशेआवाह्यध्वजंपताकांध्वजंचवायोशतमित्यृछित्य।तववायवितिवायुमभिपूज्य।वायुमाकाशगंचैवप
वनंवेगवंक्षितिं।आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां॥अनाकारोमहौजस्वयश्चादृष्टगतिर्दिवि।तस्मैपूज्यायज
गतोवायवेहंनमामिचेतिनत्वा।वायवेबलिंसमर्प्यचम्य॥उत्तरद्वारेप्रतिद्वारशारवं·कलशद्वयं·संस्थाप्यसार्वभौ
मदिग्गजंतत्रन्यस्यपूजयेत्।अथर्ववेदिनाहृत्विजोउदग्द्वारेशांतिसूक्तजपार्थत्वेनत्वांहृणे।हृहन्नेत्रोर्थर्ववेदोनु
ष्टुभोरुद्रदैवतःवैशंपायनविप्रेंद्रकृत्विग्भवेममखेभवेतिप्रत्येकंहृत्वाशंनोदेवीरितिप्रत्येकंपूजयेत्।ततोनरयु
तविमानस्थंकुंडलहारकेयूररुचिरांबरगदावरददक्षिणवामभुजद्वयंमुकुटिनंमहोदरंमहाकायंहरितवर्णंकु

वेरंध्यात्वा।ॐएह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्धं।सर्वौषधीभिःपितृभिःसहैवगृहाणपूजांभगव
न्नमस्ते।भोसोमइहागच्छेहतिष्ठेतिसांगादिंसोमंशारकलशद्वयेआवाह्यहरितपताकांध्वजंचाप्यायस्वेत्यछित्य
सोमोधेनुंवयंसोमेतिवापूजयित्वा।सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः।तस्मैसोमायदेवायनक्षत्रापतये
नमःइतिनत्वासांगायेत्यादिकुबेरायैनमाषभक्तबलिंसमर्पयामीतिसमर्प्यार्चम्य।।ईशान्यांपूर्ववत्कलशंप्रति
ष्ठाप्यतत्रसुव्रतीकं·मंगलंचसंपूज्य।ॐवृषारूढंदक्षिणवामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लवर्णमीशानंध्या
त्वा।एह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगवरेणसार्धंलोकेशयज्ञेश्वर्ययज्ञसिद्धैर्गृहाणपूजांभगवन्नम
स्ते।भोईशानेहागच्छेहतिष्ठेतिसांगादिंईशानेकलशेआवाह्यसवर्णंश्वेतांवापताकांध्वजंचामित्वादेवेत्यछित्य
नमीशानमितीशानंपूजयित्वा।वृषस्कंधसमारूढंशूलहस्तंत्रिलोचनंआवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां
सर्वाधिपोमहादेवईशानःशुक्लईश्वरः।शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमःइतिनत्वाईशानायबलिंदत्वा
चम्य।पूर्वेशानयोर्मध्येअधउद्दिश्यअनंतंशयनासीनंफणासप्तकमंडितंपद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयं

चक्रगदाधरोर्ध्वाधोवामकरद्वयंनीलवर्णमनंतंध्यात्वाएह्येहिपातालधरामरेंद्रनागांगनाकिंनरगीयमानायसे
रगेंशामरसिद्धसंघैरनंतरक्षाध्वरमस्मदीयं।भोअनंतइहागच्छेहतिष्ठेतिसांगादिमनंतमावाह्यमेघवर्णंश्वेतां
वापताकांध्वजंचायंगौरित्यछित्यायंगौरित्येवंसंपूज्यायोसावनंतरूपेणब्रह्मांडंसचराचरंपुष्पवद्धारयेन्मूर्धि
नस्मैनित्यंनमोनमइतिनत्वासांगायेत्यादिअनंतायबलिंसमर्प्यचम्य।पश्चिमनैर्ऋत्यमध्येतूर्ध्वमुद्दिश्यअ
क्षसूत्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयंस्रुक्स्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंचतुर्मुखंश्मश्रुजटिलंलं
बोदरंरक्तवर्णंब्रह्मणंध्यात्वाएह्येहिसर्वाधिपतेसुरेंद्रलोकेशसार्धंपितृदेवताभिः"सर्वस्यधातास्समितप्रजावो
विशाध्वरंनःसतंशिवायनोब्रह्मन्निहागच्छेहतिष्ठेतिसांगादिंआवाह्यरक्तपताकांध्वजंचब्रह्मजज्ञानमितिछि
त्यब्रह्मजज्ञानमितिपूजयित्वापद्मयोनिश्चतुर्मूर्त्तिर्वेदवासःपितामहःयत्राध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमो
नमःइतिनत्वासांगायेत्यादिब्रह्मणेबलिंदत्वाचम्य।।मंडपमध्येत्वरत्नीदंडेदशहस्तदीर्घंत्रिहस्तविस्तृतंमहा
ध्वजंश्वेतवर्णंइंद्रस्यहस्मइतिस्थापयित्वात्रापिब्रह्मपूजनमितिकेचित्।ततःमंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्यो

नमः विशेषुकिंनरेभ्योनमः पृष्टेपन्नगेभ्योनमश्चतिपूजयित्वा॥॥ततः पूर्वस्यांदिशिकिंचिन्नूमिमुपलिप्यतत्रोपवि
श्यात्रैलोक्यस्थेभ्यः स्थावरेभ्यो॥भूतेभ्योनमः त्रैलोक्यस्थेभ्यश्चराचरेभ्यश्चभूतेभ्योनमः॥ब्रह्मणेन॰विष्णवे॰शिवाय॰दे
वेभ्योनमः दानवेभ्यो॰गंधर्वेभ्यो॰यक्षेभ्यो॰राक्षसेभ्यो॰राक्षपन्नगेभ्यो॰ऋषिभ्यो॰मनुभ्यो॰गोभ्यो॰देवमातृभ्योन
मः॥एताःदेवताआवाह्यपूजयित्वाभूमावेवैताभ्योबलीन्दत्वाप्रार्थयेत्॥त्रैलोक्येयानिभूतानिस्थावराणिचरा
णिच॥ब्रह्मविष्णुशिवैः सार्धंरक्षांऽकुर्वंतुतानिमे॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेव
मातरएवच॥सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः॥रक्षंतुमंडपंसर्वेविघ्नंतुरक्षांसिसर्वतः॥॥ततआचम्यप्राङ्मु
ण्येनागत्यप्रासादस्याग्रतः पंचगव्याद्भिनिःशुद्धायांभूमौअक्षतैरेकाशीतिपदंमंडलमुपकल्प्यपदेषुसन्नधा
न्यपुंजान्कृत्वातेषुचारिपूर्णानेकाशीतिकलशान्कृत्वानवनवकानांतत्रतत्रमध्यंमध्यंकोष्ठेस्थात्वातेषुआ
दौनवकलशान्मध्यपूर्वादिक्रमेणाग्नेयेतिस्थापयेत्॥तत्रसोमायवनस्पत्यंतर्गतायनमश्चतिशम्युडुंबराश्वत्थ
चंपकाशोकपलाशन्यग्रोधकदंबाम्रबिल्वार्जुनतरुसंभवंपल्लवद्वादशकं॰मध्यनवकमध्यकोष्ठस्थेक

लशेनिसिंपेत्॥१॥पद्मकरोचनाश्वंकुरदर्भपिंजूलश्वेतसर्षपसितरक्तचंदनजातीकुसुमक्रंदनद्यावर्तिनी
दशकंपूर्वनवकमध्यस्थे॥२॥व्रीहितिलसुवर्णरजतसमुद्गगामिनीनदीकूलत्रयमृत्तिकाभूम्यास्पृष्टगोम
यमितिसन्नकमाग्नेये॰३॥सहदेवीविष्णुक्रांताभृंगराजमहौषधीःशमीशतावरीगुडूचीश्यामाकमित्यष्टकं
याम्ये॰४॥कदलीफलनालिकेरबिल्वनारिंगमातुलिंगबदरामलकमितिफलसन्नकंनैर्ऋते॰॥५॥मंत्रसा
धितपंचगव्यंवारुणे॰॥६॥शम्युडुंबराश्वत्थन्यग्रोधपलाशचंपकषायंवायव्ये॰७॥सहदेवीबलाविष्णुक्रांताश
तावरीगुडूचीवचाव्याघ्रीतिमंगलसूत्राष्टकंसौम्ये॰८॥वल्मीकःसंगम॰क्षेत्र॰वराहोत्कृष्ट॰अश्वस्थान॰गज
स्थानकलिरोत्कृष्ट॰गोष्ठ॰एताःसप्तमृदःईशाननवकमध्यकुंभेविन्यस्यहिरण्यवर्णामितिश्रीसूक्तेनानुमं
त्र्यसूत्रेणपृथक्पृथग्वेष्टयेत्॥शेषानांधोदकपूरितानूमध्यमनवकादिमध्यमकुंभानांसमंतात्प्रतिनवक
मष्टावष्टौविन्यपूर्वादिक्रमेणसंस्थाप्यमूलमंत्रेणाभिमंत्र्यमध्यनवकंत्रिसूत्र्यावेष्ट्यएवंपूर्वनवकंएवंप्रति
नवकंवेष्टयित्वा॥अभ्यंतर्बहिरधस्तारूर्ध्वंचप्रासादंपंचगव्येनप्रोक्ष्यमूर्धनिंदिवइतिवल्मीकमृदाविप्य॥ओ

DR BHAU DAJI MEMORIAL

षधयःस॰सोमायवनस्पत्यंतर्गतायेतिमंत्रान्यांशम्यादिवादशकलशेनमध्यनवकमध्यस्थेनप्रासादंस्नापयेत्॥१॥समुद्रज्येष्ठाइतीशाननवकमध्येनसप्तमृत्कुंभेन॰।२॥यत्तायत्तावइतिवायव्यनवकमध्यस्थेनकषायकुंभेन॰।३॥पयःपृथिव्यामितिवारुणनवकमध्यस्थेनपंचगव्यकुंभेन॰।४॥याःफलिनीरितिनैऋतनवकमध्यस्थेनफलकुंभेन॰।५॥हंसःशुचिषदित्युदङ्नवकमध्यस्थेनमंगलमूलकलशेन॰।६॥विष्णोरराटमितिपूर्वनवकमध्यस्थेननंद्यावर्तादिदशककुंभेन॰।७॥सोमंराजानमित्याग्नेयनवकांतःस्थेनव्रीह्यादिसप्तककलशेन॰।८॥विश्वतश्चक्षुरितियाम्यनवकांतःस्थेनश्यामाकाष्टककुंभेन॰।९॥इदमापःप्रवहतेत्यष्टाष्टनिःप्रागादिक्रमेणमध्यनवकादिनिःक्रमेणप्रासादंसशिखरंस्नापयेत्॥एकाशीतिकलशासंभवेसुंधध्वंदैव्यायकर्मणेदेवयज्यायेतिदैव्यायकर्मणेसुंधध्वंयज्ञेसुप्राःपराजग्मुस्तइतेनसुंधतामितिवागंधोदककलशेनैकेनवास्नापयेत्॥ततोदेवरूपंप्रासादंध्यात्वापताकाध्वजैरलंकृत्यवस्त्रेणावेष्टगंधाद्यैरभिपूज्यसूषयित्वात्रिसूत्र्याःवेष्टप्रासादाधःवास्तुपुरुषंसंचिंत्य॥ॐह्रींसर्वदेवमयाचिंत्यसर्वरत्नोज्वलाकृते॥यावच्च

त्रा

श्चसूर्यश्चस्तावदत्रस्थिरोभवेत्यधिवासनमंत्रेणसंप्रार्थ्य॥प्रासादेपुष्पमंडपिकां॰गर्भगृहेमंडपेचवितानानिबध्वासमंतात्रस्त्रैरावेष्ट्य॥अर्घ्यहस्तआचार्योदेवसमीपंगत्वासंकल्पीकृतवियद्देवायार्घ्यंदत्वानिर्माल्यमपसार्यापिंडिकासहितंदेवंवारिणाप्लावयेत्॥गावरणमभ्यर्च्यपुनरर्घ्यंदत्वानिर्माल्यमुद्वांबध्वानमस्कृत्यदेवंस्नापयेत्॥आप्यायस्वेतिक्षीरेण्य॰समुद्रज्येष्ठाइतिगंधोदकेन॰।कुपसरद्विवेतिसर्वदधिकाव्याइतिदध्ना॰।आपोहिष्ठेतिसुखोदकेन॥शुक्रमसीतिघृतेन॰।शंनोदेवीरितिगंधोदकेन॰।कुपसरद्विवेतियवगोधूमचूर्णेनोद्वर्त्यपूनःशुद्धोदकेनसमंतात्स्नाप्यमंत्रैःशुद्धोदकोनानिषिच्यसुगंधवस्त्रेणदेवंपरिमार्ज्यवस्त्रेणपरिधाप्यभूषणैर्गंधाद्यैश्चसंपूज्यप्रणम्यविज्ञाप्य॥बहिरागत्यायागमंडपाद्बहिरीशाननागेदशरेखंप्रासादंबास्तुमंडलमुल्लिख्यातत्रवास्तुपुरुषंसर्वदेवमयंसर्वाधारंविचिंत्यतत्रवास्तुनःपूजांविधायबहिर्दिगीशेभ्योबलिंदत्वाचम्य॥यागमंडपमागत्यमध्यवेद्यांमंडलेब्रह्मादिमेवंतादेवताःपूजयित्वामंडलमध्येकर्णिकायांभूमौदेवसांगंसंपूज्यप्रासादमागत्यगंधाक्षतपुष्पैःप्रासादेतत्वन्यासंकुर्यात्॥॥सयथा॥आदेपादशिलासुप्र

थिव्यादीनिन्यसेत्।ॐ ह्रांपृथिवीतत्वायनमः पृथिवीतत्वंप्रासादपादयोर्न्यसामीतिॐ ह्रामितिचसर्वत्र॥ॐ ह्रांपृथिवीतत्वाधिपतयेश्रीकंठायनमश्रीकंठपादः ॐ अप्तत्वायपा अप्तत्वाधिपतयेजलेशाय पा तेजस्तत्वाय तेजस्तत्वाधिपतयेत्विषांनिधये।०वायुतत्वाय वायुतत्वाधिपतयेमातरिश्वनेनमः आकाशतत्वाय आकाशतत्वाधिपतयेसूक्ष्मायनमः सूक्ष्मप्रासादपादयोर्न्यसा।पादोर्ध्वजंघास्थानंभागः॥ॐ ह्रांरूपतन्मात्रतत्वायन रूपतन्मात्रतत्वाधिपतयेभानुमते भानुमंतप्रासादजंघयोर्न्य।०रसतन्मात्रतत्वाय।०रसतन्मात्रतत्वाधिपतयेजलदायनजलदप्रासादजंघयो ०गंधतन्मात्रतत्वाय ०गंधतन्मात्रतत्वाधिपतयेगंधाख्यायन बलवत्तरंप्रासादजं।स्पर्शतन्मात्रतत्वाय स्पर्शतन्मात्रतत्वाधिपतयेबलवत्तरायन बलवत्तरंप्रासादजं।०शब्दतन्मात्रतत्वाय शब्दतन्मात्रतत्वाधिपतयेसूक्ष्मनादायनमः सूक्ष्मनादंप्रासादजंघयोर्न्यसा॥ ॥कटिस्थानंप्रासादांतर्बहिश्चयामेखला ॐ ह्रांवाक्तत्वाय ०वाक्तत्वाधिपतयेऋतुभुजायनमः ऋतुभिप्रासादकटौन्य।०पाणितत्वाय ०पाणितत्वाधिपतयेसमानाय समानंप्रासादकटौ।०पादतत्वाय

पादतत्वाधिपतयेचंक्रमायन चंक्रमंप्रासादकटौ।०पायुतत्वाय पायुतत्वाधिपतयेत्वरितभुजेनमः त्वरितभुजंप्रासादकटौन्य।०उपस्थतत्वाय उपस्थतत्वाधिपतयेघनानंदायन घनानंदंप्रासादकटौन्य॥ ॥प्रासादमध्येनाभिस्थानं।०श्रोत्रतत्वाय श्रोत्रतत्वाधिपतयेव्योमाधारायनव्योमाधारंप्रासादनाभौ।त्वक्तत्वाय त्वक्तत्वाधिपतयेसर्वगायन सर्वगंप्रासादनाभौ।०चक्षुतत्वाय चक्षुस्तत्वाधिपतयेप्रकाशाय प्रकाशंप्रसादनाभौ।०रसनतत्वाय रसनतत्वाधिपतयेमहावक्त्राय महावक्त्रंप्रासादनाभौ।०घ्राणतत्वाय घ्राणतत्वाधिपतयेविघ्नेंडकाय विघ्नेंडकंप्रासादनाभौ।द्वारोपरिमेखलाकंठस्थानं०मनस्तत्वाय मनस्तत्वाधिपतयेसंकल्पाय संकल्पंप्रासादकंठे।०बुद्धितत्वाय बुद्धितत्वाधिपतयेबुद्धये बुद्धिंप्रासादकंठेन्य०अहंकारतत्वाय अहंकारतत्वाधिपतयेअहंकृतयेनअहंकृतिंप्रासादकंठे।०चित्ततत्वाय चित्ततत्वाधिपतयेमनसेनमः मनःप्रासादकंठे।०प्रासादद्वारमध्ये०प्रकृतितत्वाय प्रकृतितत्वाधिपतयेपितामहायन पितामहंद्वारमध्ये॥देवपिंडीकाहृदयं।०पुरुषतत्वाय पुरुषतत्वाधिपतयेविस्मवेन विघ्नंप्रासादहृदये प्रासादकलशे०सदाशि

वतत्वायन॰सदाशिवतत्वाधिपतयेअनेशाय॰अनेशंकल्पशेन्य॰गर्भद्वारंमुखंस्मृतं॥ॐकालतत्वाय॰कालत
त्वाधिपतयेक्रतुध्वजाय॰क्रतुध्वंजकल्पशेगर्भद्वारेन्य॰विद्यातत्वाय॰विद्यातत्वाधिपतयेविस्मवेन॰विस्मुद्वासा
रमुखेन्य॰॥कल्पशोपरिचक्राद्यायुधचिक्रेभ्योनमःचक्राद्यायुधचिक्रानिकल्पशोपरिन्यसामीतिविस्मो॥॥शिवेतु
शूलाद्यायुधचिक्रानि॰॥गणपतौअंकुशाद्यायुधचिक्रानि॰एवंस्थाप्यदेवायुधान्यालोक्ययोज्यानि॥ॐहांसंसत्वा
य॰सत्वंगर्भमध्ये॰॥ॐहांरंरजसेनमःरजोगर्भमध्ये॰॥ॐहांतंतमसेनमःतमोगर्भमध्ये॰॥ॐहांमंवह्निमंडलाय
॰वह्निमंडलंगर्भमध्ये॰॥ॐहांसूर्यमंडलायसूर्यमंडलंगर्भमध्ये॰॥ॐहांउंसोममंडलायसोममंडलंचगर्भमध्ये
न्यसामिइति॥द्वासादेतत्वानिविन्यस्यातद्देवत्यैःसूक्तमंत्रैश्चतिस्मृत्यागमोदितैः॥प्रणवेनव्याहृतिभिरुपचा
रानथाचरेत्॥छत्रचामरमालाभिर्नृषावस्त्रैश्चभूषयेत्॥गंधैःपुष्पैश्चधूपैश्चदीपैरारार्तिकैरपि॥शालिपिष्टो
द्भवैर्दीपैःपंचभिर्नवभिस्तुवा॥कुर्याद्दारार्तिकंचैवकांस्यपात्रेसमुज्वलेत्॥महद्भिरुपचारैश्चनांबूलैश्चफलैर
पि॥ऊर्ध्वऊषुणमंत्रेणदधिदूर्वाक्षतादिभिः॥दीर्घायुत्वादिभिर्मंत्रैर्देवरूपंतमर्चयेत्॥तस्यरक्षासदाकार्या

रक्षोघ्नैःसूक्तमंत्रकैः॥त्रिसंध्यैःसार्वकालीनैरात्रिसूक्तजपादिभिःवेदवादित्रनिर्घोषैःपुराणपठनादिभिः॥जाग
रस्तत्रवैकार्यैयावद्वैशेषिकंदिनं॥एवंकृत्वा॥ॐह्रींसर्वदेवमयाचिंत्यसर्वरत्नोज्वलाकृते॥यावच्चंद्रश्चसूर्यश्चता
वदत्रस्थिरोभवेतिगंधाक्षतपुष्पैरधिवासयेत्॥ततआचार्यःयागमंडपमागत्यमुख्यकुंडपश्चिमतउपविश्यआ
चम्य॰देशकालौस्मृत्वाद्वासादोद्यापनांगंविहितहोमंकरिष्ये॥तदंगंकुंडसंमार्जनोल्लेखनोपलेपनमेखलायो
निदेवतास्थानेपूजनाग्निप्रतिष्ठांचकरिष्ये॥इतिसंकल्प्यउपलेपनोल्लेखलांछनादिकृत्वा॥उपरिमेखलायांश्वे
तवर्णालंकृतायांश्रद्धांविष्णुरितिविष्णुमावाह्यपूजयेत्॥मध्यमेखलायांरक्तवर्णालंकृतायांब्रह्मज्ञानमिति
ब्रह्माणं॰॥अधोमेखलायांकृष्णवर्णालंकृतायांकमुद्भमितिरुद्रं॰॥योन्यांरक्तवर्णालंकृतायांगौरीमिमायेतिगौ
रीं॥पूजयेत्॥ततोग्निप्रतिष्ठापयेत्संमुखीकृत्य॥अस्याग्नेर्गर्भाधानादिषोडशसंस्कारसिध्यर्थंव्याहृतिहोमंकरिष्ये
इतिसंकल्प्यस्रुवमाज्यस्थालींस्रुक्स्रुवौचासाद्यस्रुक्स्रुवसंस्काराद्याज्यसंस्कारांतकृत्वा॥प्रतिसंस्कारंगणनया
व्याहृतिभिर्दशदशाज्याहुतीर्हुत्वैवमग्निःसंस्कृतोभवति॥ततःप्रागाद्याचार्यःप्रासादप्रतिष्ठांगममुकर्तुं

उविहितहोमंकरिष्ये।तदंगकुंडसंमार्जनादिसंकल्प्यमेखलादिषुदेवताःसंपूज्य।आचार्यकुंडाद्अग्निनाग्निःसमि
ध्यतइत्यग्निमुद्धृत्यव्याहृतिभिःस्वेस्वेकुंडेषतिष्ठापयेयुःअग्नेर्ध्यानादिकुर्युः।ततोमुख्याचार्यःकुंडेशान्यांमंत्रैःक
लशंप्रतिष्ठाप्यतत्रवरुणंपूजयेत्।भागाद्याचार्याअपिस्वकुंडेशान्यांमंत्रैःकलशंप्रतिष्ठाप्यदेवतास्तत्रावाहयेयु
तत्रपूर्वकुंडलंकेशेपृथिवीमूर्त्तिं·पृथिवीमूर्त्यधिपतिंशर्वं·लोकपालमिंद्रं·अग्निमूर्तिंअग्निमूर्त्यधिपतिंपशुप
तिं·लोकपालंयमं·सूर्यमूर्त्तिंसूर्यमूर्त्यधिपतिंरुद्रं·लोकपालंनिर्ऋतिं·इति।।अथपश्चिमकुंडकलशेजलमू
र्त्तिं·।जलमूर्त्यधिपतिंभवं·लोकपालंवरुणं·वायुमूर्त्तिं·वायुमूर्त्यधिपतिंईशानं·लोकपालंवायुं आकाशमू
र्त्तिं आकाशमूर्त्यधिपतिंमहं·लोकपालंईशानंचेतिषट्षडाद्यासंपूज्यान्वानंकुर्युः।।आदौईशान्यांमुख्या
चार्यःसमिद्यंत्रयंवादायप्रासादप्रतिष्ठांगमौहोमेदेवतापरियहार्थमन्वाधानंकरिष्ये·आज्यभागांतमुक्का
पृथिव्यादितत्वतत्वाधिपतीश्चप्रत्येकंपलाशोदुंबराश्वत्थशम्यपामार्गसमित्तिलपायसाज्यद्रव्यैः प्रतिद्रव्य १०
मष्टाष्टाहुतिभिःस्थाप्यदेवं·पलाशादिद्रव्यैः।।प्रतिद्रव्यमष्टाविंशत्याहुतिभिःपिंडिकांअष्टाविंशत्याहुतिभिस्ति

लद्रव्येण·लक्ष्मीगरुडंचप्रत्येकंअष्टाविंशत्यष्टाविंशतिसंख्याभिस्तिलाहुतिभिः ब्रह्मादिमंडलदेवताश्चप्रत्ये
कंअष्टाष्टशतशतिलाहुतिभिः एताःप्रधानदेवताः संद्योयस्येपुनः प्रधानंशेषहोमदेवताः एकैकयाज्याहुत्या
वास्तोष्पतिंस्थाप्यदेवंआद्योरंचप्रत्येकंतिलद्रव्येणाष्टोत्तरशतसंख्यायस्येशेषेणेत्यादिएतादेवताःसमाग्निदि
नेयस्यइत्यादि।पूर्वकुंडेन्वाधानंपृथिवीमूर्त्तिंपृथिवीमूर्त्यधिपतिंशर्वं·लोकपालमिंद्रं·अग्निमूर्त्तिं अग्निमूर्
त्यधिपतिंपशुपतिं·लोकपालमग्निंचपलाशोदुंबराश्वत्थशम्यपामार्गसमित्तिलचर्वाज्यैःप्रत्येकंप्रतिद्रव्यमष्टाष्टा
हुतिभिःस्थाप्यदेवंपलाशादिद्रव्यैःप्रतिद्रव्यमष्टाविंशत्याहुतिभिःपिंडीकांलक्ष्मीगरुडंचअष्टाविंशःत्याहु
तिभिस्तिलद्रव्येण·शेषेणेत्यादि।।।।दक्षिणकुंडेन्वाधाने·यजमानमूर्त्तिं·यजमानमूर्त्यधिपतिंउग्रं·लोकपालं
यमं·सूर्यमूर्तिंसूर्यमूर्त्यधिपतिंरुद्रं·लोकपालंनिर्ऋतिंच·पलोदुंबराश्वत्थशम्यपामार्गसमित्तिलचर्वाज्यैःप्रत्ये
कंप्रतिद्रव्यंअष्टाष्टाहुतिभिःस्थाप्यदेवंचपलाशोदुंबरादिद्रव्यैःप्रतिद्रव्यमष्टाविंशत्याहुतिभिःपिंडीकांलक्ष्मी
गरुडंचतिलद्रव्येणप्रत्येकंअष्टाविंशत्याहुतिभिः०शेषेणेत्यादि।।।।अथपश्चिमेजलमूर्त्तिं·जलमूर्त्यधिपतिंभवं·

लोकपालंवरुणं·वायुर्त्यधिपतिंर्ईशानं·लोकपालंवायुं·पलाशोडुंबराश्वत्थशम्यपामार्गसमिन्निलचवर्ज्यैःप्रत्येकं
प्रतिद्रव्यमष्टाष्टाऽऽहुतिभिःस्थाप्यदेवं·पलाशादिद्रव्यैःप्रतिद्रव्यमष्टाविंशत्याऽऽहुतिभिः पिंडिकांलक्ष्मीगरुडंचप्रत्ये
कमष्टाविंशत्यष्टाविंशतिसंख्याभिस्तिलाऽऽहुतिभिः शेषेणेत्यादि·॥ ॥अथोत्तरेसोममूर्त्तिंसोममूर्त्यधिपतिंमहा
देवं·लोकपालंकुबेरं·आकाशमूर्त्तिं आकाशमूर्त्यधिपतिंनामिंःलोकपालमीशानंच·पलाशोडुंबराश्वशशम्य
पामार्गसमिन्निलचवर्ज्यैःप्रत्येकंप्रतिद्रव्यमष्टाऽऽहुतिभिःस्थाप्यदेवंपलाशादिद्रव्यैःप्रतिद्रव्यमष्टाविंशत्यष्टाविं
शत्याऽऽहुतिभिः।पिंडिकांलक्ष्मीगरुडंचतिलद्रव्येणप्रत्येकमष्टाविंशत्यष्टाविंशत्याऽऽहुतिभिःशेषेणेत्यादि॥ ॥
मुख्याचार्योमंडपाद्बहिःगंगायमुनागोदावर्याद्यास्रोतस्तोधेनूर्ध्वातत्ययसावत्सुंश्रपयित्वाहोमयेदितिवाके
चित्केवलेनपायसेनैवशथिव्यादितत्वतत्वेशानांहोमइतियज्ञाज्ययवतिलैरेवतत्वतत्वेशमूर्त्यादीनांहो
मइतिचकेचित्॥अस्मिन्पक्षेप्रत्येकमष्टोत्तरशताष्टाविंशतिसंख्याग्राह्या॥ ॥मुख्याचार्यःतत्वतत्वाधिपतिन्य
उक्तद्रव्यैरुक्तसंख्यायानाममंत्रैर्हुत्वा·स्थाप्यदेवस्य·इदंविष्णुः विष्णो॥ ॥देवतांतरेतुतत्तन्मंत्रोग्राह्यः॥क्रीयते

तस्माच्चेतिविष्णुपिंडिकायाः॥ रुद्रपिंडीकायाआपोहिष्ठागोरामिमायजनातवेदसइत्यादयः॥ब्रह्मणःपिंडिका
यांवेदात्मनायविद्महइति।सूर्यपिंडिकायास्तच्चक्षुरित्यादयः॥देवतांतरेतुशिवविष्णुनेदेनव्यवस्था॥हिर
ण्यवर्णामितिलक्ष्म्याः॥तत्पुरुषायविद्महेसुवर्णपक्षायेतिगरुडस्य।यत्रपरिवारानावस्तत्रहोमारावपितत्प
र्तनानावः।ब्रह्मादिमंडलदेवतानांस्थापनमंत्रैर्होमइति॥॥पूर्वकुंडेहोममंत्राःस्योनापृथिवीतिपृथिवीमूर्तेः
अघोरेभ्यइतिरात्रस्यत्रातारमिंद्रंइंद्रस्यःअग्निंदूतंअग्निमूर्तेः।तेजःपशूनामिति·पशुपतेः५॥अग्नआयाही
तिलोकपालस्याग्नेः॥६॥त्रासादस्थदेवपिंडिकापरिवारवाहनानांउक्तमंत्रैर्होमः१०॥ ॥अथदक्षिणकुंडेमं
त्राः।असिहिवारसेन्यइतियजमानमूर्तेः।त्वमिंद्रसजोषसमित्कयस्यइयं मायसोमंयमस्यइडुत्यं·सूर्य
स्यआवोराजानंरुद्रस्य५अस्कन्वंतमितिनिर्ऋतेः६त्रासादस्थदेवपिंकापरिवारवाहनानांदुक्तमंत्रैर्होमः॥१०
अथपश्चिमकुंडेहोममंत्राःआपोहिष्ठेतिजलमूर्वर्तेः।नमोनवायचेतिभवस्यइमंमेवरुणेतिवरुणस्यइवा
नआवात्वितिवायोः॥७॥तमीशानमितीशानस्य५आनोनियुद्भिरितिवायोः६त्रासादस्थदेवपिंडिकापरिवा

रवाहनानामुक्तमंत्रैर्होमः॥१०॥॥अथोत्तरकुंडेहोममंत्राः॥वयंसोमेतिसोममूर्तेः१तत्पुरुषायेतिमहादेव
स्यअग्नित्यग्नितिलोकपालस्यकुबेरस्यःआदित्यत्वत्स्येत्याकाशस्यधूम्रगोनामेतिनामस्या५॥अग्नि
देवेताशानस्यद्वासादस्थदेवपिंडिकावाहनपरिवाराणांउक्तमंत्रैर्होमः॥एवंहोमेक्रियमाणे॥॥॥चारजा
कजप्यानिजपेयुःतत्र॥पूर्वेश्रीसूक्तं॰पवमानं॰सोमसूक्तं॰सुमंगलं॰शंनश्चंद्रमासूक्तं॰रक्षोघ्नं॰रात्रिसूक्तंचे
ति॥॥अथदक्षिणे॰रुद्रं॰पुरुषसूक्तं॰सोमोधेनुमितिसोम्यं॰सुक्रियं॰मंडलाध्यायं॰कूष्मांडइति॥अथपश्चिमे
वामदेव्यं॰बृहत्साम॰ज्येष्ठसाम॰रथांतरंपौरुषंरुद्रसाम॰इति॥उत्तरे॰स्कंदाप्यदेवाथवशीर्षं॰नीलरुद्रं॰मधुसू
क्तंरेवत्यं॰रक्षोघ्नंचेति॥॥एवंहोमंसंपाद्यदेवायनिवेद्यफडित्यस्त्रमंत्रेणाज्यंहुत्वाअष्टोवारिपूर्णान्कला
नशान्देवस्यसमंतात्मंत्रैर्विन्यस्यदेवंप्रासादंचाधिवासयेत्॥रात्रौमंगलध्वनिगेयजागरादिनिर्महोत्स
वंकुर्यात्॥॥इत्यधिवासनं॥अत्रत्रिरात्राद्यधिवासनपक्षेतुप्रत्यहंआविर्हितदेवतापूजनंकुंडाग्नीनांपरि
समूहनपर्युक्षणंपरिस्तरणपूजनोत्तरंप्रधानहोमंचकुर्युःमुख्याचार्यहोमोत्तरंपृथिव्यादितत्वन्यासंकृत्वादे

वंप्रासादंचपूजयित्वाबलिंदद्यादिति॥यजमानोव्यत्यागंकृत्वाप्रत्यहंदेवब्राह्मणपूजनमनिवारितमन्नदानंचकु
र्यात्॥यजमानसहिताआचार्याद्यःसमाप्तिदिनपर्यंतमग्नीन्नक्षेयुरुपवसेयुश्चेति॥अथःप्रातःकृत्यं॥स
माप्तिदिनेप्रातःकृत्यंनिर्वर्त्ययजमानान्वितआचार्यःप्रासादंप्रविश्यदेवस्यदक्षिणायांभूमौमंत्रविग्रहंदेवम
न्यत्रसंपूज्यप्रतिमांचसंपूज्यसंस्नाप्यपूर्ववदर्घ्यंदत्वाप्रणम्यदिग्बलिंदत्वाऽचम्य॥यागमंडपमागत्याचार्ये
मुख्यकुंडसंनिधावुपविश्यदेशकालौस्मृत्वा॥प्रासादोद्यापनांगंविधिप्राप्तंशेषहोमंकरिष्ये॥स्रुक्वेणाज्य
माहायसौत्रमंत्रैर्नाममंत्रैर्वज्रिकुर्यात्॥मंत्रास्त्वाद्येवक्ष्यतेनाममंत्रायथा।ॐअग्नयेस्वाहाअग्नयइदं
ममेतियजमानोयथादेवतंत्यागंकुर्यात्॥ॐवायवेस्वाहा॥ॐआदित्यायस्वाहा॥ॐचंद्रमसेस्वाहाॐभ्र
मवादित्यःस्वाहा॥ॐमध्यादित्यःस्वाहा॥ॐचित्रादित्यःस्वाहा॥इतिसप्ताहुतीर्हुत्वाअर्घ्यदस्तोयजमाना
न्वितआचार्यदेवसमीपमागत्यार्घंदत्वापूर्ववत्संस्नाप्यगंधाद्यैःपूजयित्वाप्रणमेत्॥पुनःक्षीरनीरकुशा
ग्रतिलतंडुलयवसिद्धार्थकपुष्पाण्येकस्मिन्पात्रेकृत्वाऽष्टांगमर्घ्यंदेवमूर्ध्निदत्वाहोमंनिवेदयेत्॥य

DR BHAU DAJI

जमानोपिसौवर्णकमलंदेवमूर्ध्निदत्वाभ्यर्च्यप्रणमेत्॥अथाचार्यश्चबहिर्निर्गत्यप्रासादाभिमुखोभूत्वाप्रासा
दंदेवरूपंध्यात्वाध्यानेनस्थापयेत्॥तध्यानंयथा॥॥पादौपादशिलास्तस्यजंघापादोर्ध्वमुच्यते॥गर्भश्चैवोरु
रंतेयंकटिश्चकटिमेखलाः॥तत्स्तंभाबाहवोज्ञेयाघंटानिष्कापकीर्तिता॥दीपःग्राणोस्यविज्ञेयोव्यपानोज्ञ
ननिर्गमः॥ब्रह्मस्थानंतदेतस्यसनालिःपरिकीर्त्तितः॥हृदयंपिंडिकाज्ञेयाप्रतिमाजीवउच्यते॥पादचारस्त्व
हंकारोज्योतिस्तच्चक्षुरुच्यते॥तदूर्ध्वप्रकृतिस्तस्यप्रतिमापुरुषःस्मृतः॥तत्तत्कुंभादयोधारंतस्यप्रज्ञानंस्मृ
तं॥मुखंनासाभवेन्नासागवाक्षःकर्णउच्यते॥कायपाणीस्मृतःस्कंधोग्रीवामंजकसारकः॥कलशस्तछि
रोज्ञेयंमज्जास्निग्धरसंहितत्॥मेदश्चैवसुधांविंद्यात्पलंमांसमुच्यते॥अस्थीनिचतुलास्तस्यस्नायुःकीला
दयःस्मृताः॥चक्षूंषिचस्वरास्तस्यधनःकेशाःप्रकीर्त्तिताः॥एवंपुरुषरूपंतंध्यात्वाचमनसासुधीः॥जगत्यास १३
हप्रासादंध्यानमंत्रेणस्थापयेत्॥सर्वदेवमयाचिंत्यसर्वरत्नोज्वलाकृते॥यावच्चंद्रश्चसूर्यश्चतावदत्रस्थिरोभ
व॥ततोगंधाद्यैःपूजयित्वात्रिगुणसूत्रेणावेष्ट्य॥आचार्यःकुंडांतिकमागत्यवास्तोष्पतइत्यष्टोत्तरशतं·देव

मंत्रेणचाष्टोत्तरशतं·शांत्यर्थमघोरेणचाष्टोत्तरशतंतिलैर्हुत्वा॥स्विष्टकृत्प्रायश्चित्तबलिदानपूर्णाहुत्यंतंस
माप्यप्रागाद्याचार्याअपिस्वस्वकुंडेस्विष्टकृदादिहोमशेषंसमापयेयुः॥यजमानोदेवसमीपमागत्यवित्तानु
सारेणभूमिसुवर्णादिकंदेवायदत्वाआत्मानंनिवेद्यप्रणम्यविज्ञापयेत्॥अथाचार्योमंडपमेत्यवेद्यामुत्तर
स्यांदिशिअष्टदलंपद्मंतंडुलैरालिख्यतदुपरिभद्रासनंनिधायतस्मिन्सपत्नीकंबंधुपुत्रबांधवसहितंयज
मानमुपवेश्य॥मंगलतूर्यघोषेणपूर्वकल्पितैःशांतिकलशवासुणादिकलशस्थजलैस्तस्थुत्वापत्रवैःसमु ५८
द्भवेष्टाद्याभिषेकमंत्रैःसुरास्त्वामित्यादिपौराणैश्च॥मूर्त्तिपान्वितआचार्यउदङ्मुखोभिषिंचेत्॥ततो
जलाशयेकृतावभृथस्नानोयजमानोमंडलदेवानिष्टाभ्रान्तंपूज्यविसृज्यविभूतिंदत्वा॥मूर्त्तिमंडपादि
कमाचार्यहस्तेप्रतिपाद्यआचार्यमूर्त्तिपादौश्वपूजयित्वादक्षिणांदत्वाऽन्येभ्योब्राह्मणेभ्योवस्त्रादिदत्वा॥
देवसमीपंगत्वाप्रासादमुत्थापनेत्॥यथा॥अमुंप्रासादंशिलेष्टकादिनिर्मितं·चत्रश्रीभिजगतोप्राकारगो
पुरपरिवारदेवतालययुतंअमुकदेवतासलोकतांकामःकुलत्रयोद्धरणायअमुकदेवताप्रीतयेहमुत्स्

जामि॥इत्यक्षतपुष्पोदकनिक्षेपेणोत्सृजेत्॥यत्र प्राकारगोपुरादीनामभावतत्रयावतांसंभस्तावदेवोक्तं॥
यत्रचकेवलप्रासादएवतत्र॥अमुंप्रासादंशिलेष्टकादारुमृदादिनिर्मितंपरिवारदेवतालययुतंतद्देवतासलोक
ताकामइत्याद्यूह्यं॥ततोदेवंप्रणम्यकर्मसाकुण्यायविस्फुलिंगंस्मृत्वाब्राह्मणान्भोजयित्वासुहृत्कुटुंबी
न॥॥इतिचित्रपावन॰प्रासादप्रतिष्ठाप्रयोगः॥॥॥यदातुप्रासादोनूतनोदेवोपिनूतनः तत्रप्रासादप्रतिष्ठा॰
स्थाप्यदेवप्रतिष्ठाचसहैवक्रियतेतदामंडपप्रतिष्ठोत्तरंजलस्थंदेवमुत्थाप्यस्नानमंडपमानीयस्नपनंक्रिय
तेतदानींतत्पूर्वंपश्चाद्वारैएकाशीतिकलशैःप्रासादस्नपनंचक्रियति॥तथाचमहावेद्यांशय्यायांस्थाप्यदेवाधि
वासनोत्तरंप्रासादेपृथिव्यादितत्वतत्वाधिपतिन्यासपूर्वकंप्रासादाधिवासनंचकृत्वामुख्यकुंडेऽग्निप्रति
ष्ठांकुर्यात्॥यद्यप्येतदाचार्यकर्तृकंतथापितत्कालेअन्येनर्त्विजापिकारयितव्यं॥होमकालेपृथिव्यादित
त्वतत्वाधिपतीनांमुख्यकुंडेहोममाचार्यःकुर्यात्॥प्रधानान्वाधानेपितान्कीर्त्तयेत्॥त्रिरात्रादिष्वपिप्रत्यह
मेतेषांन्यासमंत्राणांहोमस्थाप्यादीनांचहोमसमयेभवति॥अन्यत्सर्वंदेवप्रतिष्ठातंत्रेयद्यनुष्ठितंतद्देवोभ

१७

यत्राप्युपकरोति॥इत्यलंप्रसंगेन॥शेषहोमेसौत्रमंत्रायदाहुतेतत्रमंत्रायथा॥अग्नेप्रायश्चित्तेत्वंदेवानांप्रा
यश्चित्तिरसिब्राह्मणस्त्वानाथकामःप्रपद्येयाग्निंप्रीतनूःप्रजाप्रापशुप्रीलक्ष्मीप्रीजारप्रीमग्नेतांहरणे
मिस्वाहा॥१वायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिर॰२॥आदित्यप्रायश्चित्तेत्वंदेवानां॰३॥प्रजापतेप्रायश्चित्तेत्वं॰
४॥प्रसवश्चोपयामश्चकाण्डाण्डवश्चधर्णसिश्चप्रविणंचभगश्चांतरिक्षंचसिंधुश्चसमुद्रश्चसरस्वांश्चविश्वव्य
चाश्चतेयंविष्णोयश्चनोद्वेष्टिमेषांजंभेदध्मस्वाहा॥५मधुश्चमाधवश्चशुक्र॰तपस्यश्चतेयंविष्णोयश्च॰६॥वि
वित्तंचचित्तिश्चाकूतंचाकूतिश्चाधीतंचाधीतिश्चविज्ञातंचज्ञोविनंचनामचक्रतुश्चदर्शश्चपूर्णमासश्चतेयंवि
ष्णोयश्चनोद्वेष्टिमेषांजंभेदध्मस्वाहा॥इतिसप्तमंत्राः॥॥अथप्रासादसामग्री॥कुंकुम॰पुण्याहवाचनाम
ग्री॰मधुपर्कसामग्री१गृहेकुंकुम॰कुंभआम्रपल्लवविपुल॰मंडलाचेरंग॰स्वर्णशलाकाल२खिले८खिचडाप्रा
नः॥काढीनिवेद्यंगंधपुष्पेविपुल॰शिरस॰पंचगव्य॰यंत्रांसवस्त्रे२सुपारी२५०अबीर॰बुका॰काडवाता२००पि
गचेदिवे२०नैवेद्यद्रव्य॰खारका५००विडे२००खुर्दरि॰२स्वर्णमूर्त्तिःएकातिस्त्रोवा॥देवासधोत्रजोडा१तिसुती

गुंडीप्रासादवेष्टनार्थत्रिवारपुरेजशी·मंडपवेष्टनार्थगुंडे।स्नपनकशवेष्टनार्थ।पुष्पमाळा१०मृत्कलश१ध
ताम्रकलशप्अथवा५अथवा३अथवा१वावंत्यतबकळा·मृत्पूर्णपात्रे५०समई१गणव्यादिवेष्टनव०ध्वा
पेंगी२पंचपल्लवकळा५०सप्तमृत्तिका·सर्वौषधीवाघोटीरिंगणी·गरुळवेल·आघाडा·वावडिंग·शंखिनी
कोष्ट·जटामांसी·दारुहळद०हळद·मुरवा·मनशीळ·चंदन·वेहरखंड·कचोरा·मोथ·हेयेकत्रकुटुनपुडी
१पंचरत्ने१०हिरण्यरज१५।।रक्तसूत्रगुंडे१पताकामंडपादिषु।।१२जन्याश्चयथासंभवं।ध्वजाश्च१२यथासंभ
वंचान्ये।त्यांसजयुरंडतत्संख्येनें।।महाध्वजरतदर्थदंडलोंटे२बळीचीखिचडीमध्याह्नीनिवे१सायाह्नी
अधोळीची१सप्तधान्येरनिवे१हेंसाहित्ययागमंडपी।प्रासादांतविशेषतःपल्लवादिक·शमी·उंबर·
अश्वत्थ·चंपक·अशोक·पनस·पाडर·वड·कळंब·आम्र·अर्जुन·वेल्लहेपल्लव।।१२।।पद्मक·गोरोचन·गो
रसर्षप·श्वेतचंदन·रक्तचंदन·जाइपत्री·नंद्यावर्त्तिनी·१०साळीमण१तिळ·होमाद्रिकीमण१स्वर्णरज·रू
प्यरज·१०नद्रीवेकूलहयमृत्·भूम्यसृष्टगोमय·०सहदेवी·विष्णुक्रांता·शृंगराज·महौषधी·शमी·शता

वरी·गुडूची·सांवे।ना।केळें·नारेळ·बेलफळें१५नारिंकेगें·महाबुंग५बोरें२५आंबळे७।।शम्युडंबराश्वत्थ
न्यग्रोधपलाशपंचकषाय·सहदेवी·बला·विष्णुक्रांता·शतावरी·गुडूची·वचा·व्याघ्री·यांचींमूळें८मृदः
सप्त७सुताचेंगुंडेगंध·पंचगव्यविपुळ·वल्मीकमृद्विपुळ·प्रासादेयथासंभवंपताकाध्वजाश्वप्रासादेवेष्ट
नवस्त्रें·उदवल्या२५प्रासादेपुष्पमंडपिका।प्रासादेगर्भागारेमंडपेचवितानानि·पंचामृतद्रव्यें·विपुळे·
यवगोधूमचूर्ण·सुगंधसूक्ष्मतंतुवस्त्रें·क्षुद्रवस्त्रार्थरवेडो·वाजंत्रीकुंडांसरंग·श्वेतरक्तकुसुम·घृतिकुंडंस्रु
वस्रुवौ२यज्ञपात्राणिच·ग्रहहोमसमथाशक्तिसंख्येनेंअर्कादिसमिधा।उंबरसमिधावास्रुहोमार्थ
यथाशक्तिसंख्य।।प्रधानहोमार्थसमिधापल्लवसाव्या१००उंबराच्या१०००अश्वत्थ१००शमी१०००आघा
डा१००दुधविपुळ·मधु।अथवाजवमण१तिलमण१।।पक्षद्वयीहितिळअसावेचहोमार्थ।होमार्थचरुपं
चसहस्राऊतिपर्यंत·स्वर्णकमळ१ताम्रार्घ्यपात्र१चरुस्थालीप्रतिकुंडी।।कुंडरंगांपासूनहोमद्रव्येंया
गमंडपी।।समाप्तिदिनीपूजाद्रव्यें·विपुळपुष्पादिक·बळाचीखिचडी·पूर्णाहुतिसामग्री।वसोर्धारास्रुक्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

आरंभतः समाप्तिपर्यंतं आज्यमणी ॥ अग्निजिका १ भद्रासन १ अभिषेकार्थं ताम्रपात्री १ इत्यादि पेढीध गोदानार्थं अश्व वृष ऋत्विग्दक्षिणा ब्राह्मणभोजनसाहित्य ॥ समाप्तावासादोद्यापनसामग्री ॥ ॥ शुभंभवतु